# Raghuvansha 14 by Kalidas

# રઘુવંશં સર્ગઃ ૧૪ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha14

File name : raghuvansha14.itx

Category : major_works, svara, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : Octobber 03, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૧૪ કાલિદાસકૃતમ્

ભર્તુઃ પ્રણાશાદથ શોચનીયં દશાન્તરં તત્ર સમં પ્રપન્ને ।
અપશ્યતાં દાશરથી જનન્યૌ છેદાદિવોપઘ્નતરોર્વ્રતત્યૌ ॥ ૧૪-૧ ॥

ઉભાવુભાભ્યાં પ્રણતૌ હતારી યથાક્રમં વિક્રમશોભિનૌ તૌ ।
વિસ્પષ્ટમસ્રાન્ધતયા ન દૃષ્ટૌ જ્ઞાતૌ સુતસ્પર્શસુખોપલમ્ભાત્ ॥ ૧૪-૨ ॥

આનન્દજઃ શોકજમશ્રુબાષ્પસ્તયોરશીતં શિશિરો બિભેદ ।
ગઙ્ગાસરય્વોર્જલમુષ્ણતપ્તં હિમાદ્રિનિસ્યન્દ ઇવાવતીર્ણઃ ॥ ૧૪-૩ ॥

તે પુત્રયોર્નૈરૃતશસ્ત્રમાર્ગાનાર્દ્રાનિવાઙ્ગે સદયં સ્પૃશન્તૌ ।
અપીપ્સિતં ક્ષત્રકુલાઙ્ગનાનાં ન વીરસૂશબ્દમકામયેતામ્ ॥ ૧૪-૪ ॥

ક્લેશાવહા ભર્તુરલક્ષણાહં સીતેતિ નામ સ્વમુદીરયન્તી ।
સ્વર્ગપ્રતિષ્ઠસ્ય ગુરોર્મહિષ્યાવભક્તિભેદેન વધૂર્વવન્દે ॥ ૧૪-૫ ॥

ઉત્તિષ્ઠ વત્સે નનુ સાનુજોઽસૌ વૃત્તેન ભર્તા શુચિના તવૈવ ।
કૃચ્છ્રં મહત્તીર્ણ ઇવ પ્રિયાર્હાં તામૂચતુસ્તે પ્રિયમપ્યમિથ્યા ॥ ૧૪-૬ ॥

અથાભિષેકં રઘુવંશકેતોઃ પ્રારબ્ધમાનન્દજલૈર્જનન્યોઃ ।
નિર્વર્તયામાસુરમાત્યવૃદ્ધાસ્તીર્થાહૃતૈઃ કાઞ્ચનકુમ્ભતોયૈઃ ॥ ૧૪-૭ ॥

સરિત્સમુદ્રાન્સરસીશ્ચ ગત્વા રક્ષઃકપીન્દ્રૈરુપપાદિતાનિ ।
તસ્યાપતન્મૂર્ધ્નિ જલાનિ જિષ્ણોર્વિન્ધ્યસ્ય મેઘપ્રભવા ઇવાપઃ ॥ ૧૪-૮ ॥

તપસ્વિવેષક્રિયયાપિ તાવદ્યઃ પ્રેક્ષણીયઃ સુતરાં બભૂવ ।
રાજેન્દ્રનેપથ્યવિધાનશોભા તસ્યોદિતાસીત્પુનરુક્તદોષા ॥ ૧૪-૯ ॥

સ મૌલરક્ષોહરિભિઃ સસૈન્યસ્તૂર્યસ્વનાનન્દિતપૌરવર્ગઃ ।
વિવેશ સૌધોદ્ગતલાજવર્ષામુત્તોરણામન્વયરાજધાનીમ્ ॥ ૧૪-૧૦ ॥

સૌમિત્રિણા સાવરજેન મન્દમાધૂતબાલવ્યજનો રથસ્થઃ ।
ધૃતાતપત્રો ભરતેન સાક્ષાદુપાયસંઘાત ઇવ પ્રવૃદ્ધઃ ॥ ૧૪-૧૧ ॥

પ્રાસાદકાલાગુરુધૂમરાજિસ્તસ્યાઃ પુરો વાયુવશેન ભિન્ના ।
વનાન્નિવૃત્તેન રઘૂત્તમેન મુક્તા સ્વયં વેણિરિવાબભાસે ॥ ૧૪-૧૨ ॥

શ્વશ્રૂજનાનુષ્ઠિતચારુવેષાં કર્ણીરથસ્થાં રઘુવીરપત્નીમ્ ।
પ્રાસાદવાતાયનદૃશ્યબન્ધૈઃ સાકેતનાર્યોઽઞ્જલિભિઃ પ્રણેમુઃ ॥ ૧૪-૧૩ ॥

સ્ફુરત્પ્રભામણ્ડનમાનસૂયં સા બિભ્રતી શાશ્વતમઙ્ગરાગમ્ ।
રરાજ શુદ્ધેતિ પુનઃ સ્વપુર્યૈ સંદર્શિતા વહ્નિગતેવ ભર્ત્રા ॥ ૧૪-૧૪ ॥

વેશ્માનિ રામઃ પરિબર્હવન્તિ વિશ્રાણ્ય સૌહાર્દનિધિઃ સુહૃદ્ભ્યઃ ।
બાષ્પાયમાનો બલિમન્નિકેતમાલેખ્યશેષસ્ય પિતુર્વિવેશ ॥ ૧૪-૧૫ ॥

કૃતાઞ્જલિસ્તત્ર યદમ્બ સત્યાન્નાભ્રશ્યત સ્વર્ગફલાદ્ગુરુર્નઃ ।
તચ્ચિન્ત્યમાનં સુકૃતં તવેતિ જહાર લજ્જાં ભરતસ્ય માતુઃ ॥ ૧૪-૧૬ ॥

તથૈવ સુગ્રીવબિભીષણાદીનુપાચરત્કૃત્રિમસંવિધાભિઃ ।
સંકલ્પમાત્રોદિતસિદ્ધયસ્તે ક્રાન્તા યથા ચેતસિ વિસ્મયેન ॥ ૧૪-૧૭ ॥

સભાજનાયોપગતાન્સ દિવ્યાન્મુનીન્પુરસ્કૃત્ય હતસ્ય શત્રોઃ ।
શુશ્રાવ તેભ્યઃ પ્રભવાદિ વૃત્તં સ્વવિક્રમે ગૌરવમાદધાનમ્ ॥ ૧૪-૧૮ ॥

પ્રતિપ્રયાતેષુ તપોધનેષુ સુખાદવિજ્ઞાતગતાર્ધમાસાન્ ।
સીતાસ્વહસ્તોપહૃતાગ્ર્યપૂજાન્રક્ષઃકપીન્દ્રાન્વિસસર્જ રામઃ ॥ ૧૪-૧૯ ॥

તચ્ચાત્મચિન્તાસુલભં વિમાનં હૃતં સુરારેઃ સહ જીવિતેન ।
કૈલાસનાથોદ્વહનાય ભૂયઃ પુષ્પં દિવઃ પુષ્પકમન્વમંસ્ત ॥ ૧૪-૨૦ ॥

પિતુર્નિયોગાદ્વનવાસમેવં નિસ્તીર્ય રામઃ પ્રતિપન્નરાજ્યઃ ।
ધર્માર્થકામેષુ સમાં પ્રપેદે યથા તથૈવાવરજેષુ વૃત્તિમ્ ॥ ૧૪-૨૧ ॥

સર્વાસુ માતુષ્વપિ વત્સલત્વાત્સ નિર્વિશેષપ્રતિપત્તિરાસીત્ ।
ષડાનનાપીતપયોધરાસુ નેતા ચમૂનામિવ કૃત્તિકાસુ ॥ ૧૪-૨૨ ॥

તેનાર્થવા ઁ લ્લોભપરાઙ્મુખેન તેન ઘ્નતા વિઘ્નભયં ક્રિયાવાન્ ।
તેનાસ લોકઃ પિતૃમાન્વિનેત્રા તેનૈવ શોકાપનુદેવ પુત્રી ॥ ૧૪-૨૩ ॥

સ પૌરકાર્યાણિ સમીક્ષ્ય કાલે રેમે વિદેહાધિપતેર્દુહિત્રા ।
ઉપસ્થિતશ્ચારુ વપુસ્તદીયં કૃત્વોપભોગોત્સુકયેવ લક્ષ્મ્યા ॥ ૧૪-૨૪ ॥

તયોર્યથાપ્રાર્થિતમિન્દ્રિયાર્થાનાસેદુષોઃ સદ્મસુ ચિત્રવત્સુ ।
પ્રાપ્તાનિ દુઃખાન્યપિ દણ્ડકેષુ સંચિન્ત્યમાનાનિ સુખાન્યભૂવન્ ॥ ૧૪-૨૫ ॥

અથાધિકસ્નિગ્ધવિલોચનેન મુખેન સીતા શરપાણ્ડુરેણ ।
આનન્દયિત્રી પરિણેતુરાસીદનક્ષરવ્યઞ્જિતદોહદેન ॥ ૧૪-૨૬ ॥

તામઙ્કમારોપ્ય કૃશાઙ્ગયષ્ટિં વર્ણાન્તરાક્રાન્તપયોધરાગ્રામ્ ।
વિલજ્જમાનાં રહસિ પ્રતીતઃ પપ્રચ્છ રામાં રમણોઽભિલાષમ્ ॥ ૧૪-૨૭ ॥

સા દષ્ટનીવારબલીનિ હિંસ્રૈઃ સંબદ્ધવૈખાનસકન્યકાનિ ।
ઇયેષ ભૂયઃ કુશવન્તિ ગન્તું ભાગીરથીતીરતપોવનાનિ ॥ ૧૪-૨૮ ॥

તસ્યૈ પ્રતિશ્રુત્ય રઘુપ્રવીરસ્તદીપ્સિતં પાર્શ્વચરાનુયાતઃ ।
આલોકયિષ્યન્મુદિતામયોધ્યાં પ્રાસાદમભ્રંલિહમારુરોહ ॥ ૧૪-૨૯ ॥

ઋદ્ધાપણં રાજપથં સ પશ્યન્વિગાહ્યમાનાં સરયૂં ચ નૌભિઃ ।
વિલાસિભિશ્ચાધ્યુષિતાનિ પૌરૈઃ પુરોપકણ્ઠોપવનાનિ રેમે ॥ ૧૪-૩૦ ॥

સ કિંવદન્તીં વદતાં પુરોગઃ સ્વવૃત્તમુદ્દિશ્ય વિશુદ્ધવૃત્તઃ ।
સર્પાધિરાજોરુભુજોઽપસર્પં પપ્રચ્છ ભદ્રં વિજિતારિભદ્રઃ ॥ ૧૪-૩૧ ॥

નિર્બન્ધપૃષ્ટઃ સ જગાદ સર્વં સ્તુવન્તિ પૌરાશ્ચરિતં ત્વદીયમ્ ।
અન્યત્ર રક્ષોભવનોષિતાયાઃ પરિગ્રહાન્માનવદેવ દેવ્યાઃ ॥ ૧૪-૩૨ ॥

કલત્રનિન્દાગુરુણા કિલૈવમભ્યાહતં કીર્તિવિપર્યયેણ ।
અયોઘનેનાય ઇવાભિતપ્તં વૈદેહિબન્ધોર્હૃદયં વિદદ્રે ॥ ૧૪-૩૩ ॥

કિમાત્મનિર્વાદકથામુપેક્ષે જાયામદોષામુત સંત્યજામિ ।
ઇત્યેકપક્ષાશ્રયવિક્લવત્વાદાસીત્સ દોલાચલચિત્તવૃત્તિઃ ॥ ૧૪-૩૪ ॥

નિશ્ચિત્ય ચાનન્યનિવૃત્તિ વાચ્યં ત્યાગેન પત્ન્યાઃ પરિમાર્ષ્ટુમૈચ્છત્ ।
અપિ સ્વદેહાત્કિમુતેન્દ્રિયાર્થાદ્યશોધનાનાં હિ યશો ગરીયઃ ॥ ૧૪-૩૫ ॥

સ સંનિપત્યાવરજાન્હતૌજાસ્તદ્વિક્રિયાદર્શનલુપ્તહર્ષાન્ ।
કૌલીનમાત્માશ્રયમાચચક્ષે તેભ્યઃ પુનશ્ચેદમુવાચ વાક્યમ્ ॥ ૧૪-૩૬ ॥

રાજર્ષિવંશસ્ય રવિપ્રસૂતેરુપસ્થિતઃ પશ્યત કીદૃશોઽયમ્ ।
મત્તઃ સદાચારશુચેઃ કલઙ્કઃ પયોદવાતાદિવ દર્પણસ્ય ॥ ૧૪-૩૭ ॥

પૌરેષુ સોઽહં બહુલીભવન્તમપાં તરંગેષ્વિવ તૈલબિન્દુમ્ ।
સોઢું ન તત્પૂર્વમવર્ણમીશે આલાનિકં સ્થાણુરિવ દ્વિપેન્દ્રઃ ॥ ૧૪-૩૮ ॥

તસ્યાપનોદાય ફલપ્રવૃત્તાવુપસ્થિતાયામપિ નિર્વ્યપેક્ષઃ ।

ત્યક્ષામિ વૈદેહસુતાં પુરસ્તાત્સમુદ્રનેમિં પિતુરાજ્ઞયેવ ॥ ૧૪-૩૯ ॥

અવૈમિ ચૈનામનઘેતિ કિંતુ લોકાપવાદો બલવાન્મતો મે ।
છાયા હિ ભૂમેઃ શશિનો મલત્વેનારોપિતા શુદ્ધિમતઃ પ્રજાભિઃ ॥ ૧૪-૪૦ ॥

રક્ષોવધાન્તો ન ચ મે પ્રયાસો વ્યર્થઃ સ વૈરપ્રતિમોચનાય ।
અમર્ષણઃ શોણિતકાઙ્ક્ષયા કિં પદા સ્પૃશન્તં દશતિ દ્વિજિહ્વઃ ॥ ૧૪-૪૧ ॥

તદેવ સર્ગઃ કરુણાર્દ્રચિત્તૈર્ન મે ભવદ્ભિઃ પ્રતિષેધનીયઃ ।
યદ્યર્થિતા નિર્હૃતવાચ્યશલ્યાન્પ્રાણાન્મયા ધારયિતું ચિરં વઃ ॥ ૧૪-૪૨ ॥

ઇત્યુક્તવન્તં જનકાત્મજાયાં નિતાન્તરૂક્ષાભિનિવેશમીશમ્ ।
ન કશ્ચન ભ્રાતૃષુ તેષુ શક્તો નિષેદ્ધુમાસીદનુમોદિતું વા ॥ ૧૪-૪૩ ॥

સ લક્ષ્મણં લક્ષ્મણપૂર્વજન્મા વિલોક્ય લોકત્રયગીતકીર્તિઃ ।
સૌમ્યેતિ ચાભાષ્ય યથાર્થભાષી સ્થિતં નિદેશે પૃથગાદિદેશ ॥ ૧૪-૪૪ ॥

પ્રજાવતી દોહદશંસિની તે તપોવનેષુ સ્પૃહયાલુરેવ ।
સ ત્વં રથી તદ્વ્યપદેશનેયાં પ્રાપય્ય વાલ્મીકિપદં ત્યજૈનામ્ ॥ ૧૪-૪૫ ॥

સ શુશ્રુવાન્માતરિ ભાર્ગવેન પિતુર્નિયોગાત્પ્રહૃતં દ્વિષદ્વત્ ।
પ્રત્યગ્રહીદગ્રજશાસનં તદાજ્ઞા ગુરૂણાં? હ્યવિચારણીયા ॥ ૧૪-૪૬ ॥

અથાનુકૂલશ્રવણપ્રતીતામત્રસ્નુભિર્યુક્તધુરં તુરંગૈઃ ।
રથં સુમન્ત્રપ્રતિપન્નરશ્મિમારોપ્ય વૈદેહસુતાં પ્રતસ્થે ॥ ૧૪-૪૭ ॥

સા નીયમાના રુચિરાન્પ્રદેશાન્પ્રિયંકરો મે પ્રિય ઇત્યનન્દત્ ।
નાબુદ્ધ કલ્પદ્રુમતાં વિહાય જાતં તમાત્મન્યસિપત્રવૃક્ષમ્ ॥ ૧૪-૪૮ ॥

જુગૂહ તસ્યાઃ પથિ લક્ષ્મણો યત્સવ્યેતરેણ સ્ફુરતા તદક્ષ્ણા ।
આખ્યાતમસ્યૈ ગુરુ ભાવિ દુઃખમત્યન્તલુપ્તપ્રિયદર્શનેન ॥ ૧૪-૪૯ ॥

સા દુર્નિમિત્તોપગતાદ્વિષાદાત્સદ્યઃપરિમ્લાનમુખારવિન્દા ।
રાજ્ઞઃ શિવં સાવરજસ્ય ભૂયાદિત્યાશશંસે કરણૈરબાહ્યૈઃ ॥ ૧૪-૫૦ ॥

ગુરોર્નિયોગાદ્વનિતાં વનાન્તે સાધ્વીં સુમિત્રાતનયો વિહાસ્યન્ ।
અવાર્યતેવોત્થિતવીચિહસ્તૈર્જહ્નોર્દુહિત્રા સ્થિતયા પુરસ્તાત્ ॥ ૧૪-૫૧ ॥

રથાત્સ યન્ત્રા નિગૃહીતવાહાત્તાં ભ્રાતૃજાયાં પુલિનેઽવતાર્ય ।
ગઙ્ગાં નિષાદાહૃતનૌવિશેષસ્તતાર સંધામિવ સત્યસંધઃ ॥ ૧૪-૫૨ ॥

અથ વ્યવસ્થાપિતવાક્કથંચિત્સૌમિત્રિરન્તર્ગતબાષ્પકણ્ઠઃ ।
ઔત્પાતિકં મેઘ ઇવાશ્મવર્ષં મહીપતેઃ શાસનમુજ્જગાર ॥ ૧૪-૫૩ ॥

તતોઽભિષઙ્ગાનિલવિપ્રવિદ્ધા પ્રભ્રશ્યમાનાભરણપ્રસૂના ।
સ્વમૂર્તિલાભપ્રકૃતિં ધરિત્રીં લતેવ સીતા સહસા જગામ ॥ ૧૪-૫૪ ॥

ઇક્ષ્વાકુવંશપ્રભવઃ કથં ત્વાં ત્યજેદકસ્માત્પતિરાર્યવૃત્તઃ ।
ઇતિ ક્ષિતિઃ સંશયિતેવ તસ્યૈ દદૌ પ્રવેશં જનની ન તાવત્ ॥ ૧૪-૫૫ ॥

સા લુપ્તસંજ્ઞા ન વિવેદ દુઃખં પ્રત્યાગતાસુઃ સમતપ્યતાન્તઃ ।
તસ્યાઃ સુમિત્રાત્મજયત્નલબ્ધો મોહાદભૂત્કષ્ટતરઃ પ્રબોધઃ ॥ ૧૪-૫૬ ॥

ન ચાવદદ્ભર્તુરવર્ણમાર્યા નિરાકરિષ્ણોર્વૃજિનાદૃતેઽપિ ।
આત્માનમેવં સ્થિરદુઃખભાજં પુનઃ પુનર્દુષ્કૃતિનં નિનિન્દ ॥ ૧૪-૫૭ ॥

આશ્વાસ્ય રામાવરજઃ સતીં તામાખ્યાતવાલ્મીકિનિકેતમાર્ગઃ ।
નિઘ્નસ્ય મે ભર્તૃનિદેશરૌક્ષ્યં દેવિ ક્ષમસ્વેતિ બભૂવ નમ્રઃ ॥ ૧૪-૫૮ ॥

સીતા તમુત્થાપ્ય જગાદ વાક્યં પ્રીતાસ્મિ તે સૌમ્ય ચિરાય જીવ ।
બિડૌજસા વિષ્ણુરિવાગ્રજેન ભ્રાત્રા યદિત્થં પરવાનસિ ત્વમ્ ॥ ૧૪-૫૯ ॥

શ્વશ્રૂજનં સર્વમનુક્રમેણ વિજ્ઞાપય પ્રાપિતમત્પ્રણામઃ ।
પ્રજાનિષેકં મયિ વર્તમાનં સૂનોરનુધ્યાયત ચેતસેતિ ॥ ૧૪-૬૦ ॥

વાચ્યસ્ત્વયા મદ્વચનાત્સ રાજા વહ્નૌ વિશુદ્ધામપિ યત્સમક્ષમ્ ।
માં લોકવાદશ્રવણાદહાસીઃ શ્રુતસ્ય કિં તત્સદૃશં કુલસ્ય ॥ ૧૪-૬૧ ॥

કલ્યાણબુદ્ધેરથવા તવાયં ન કામચારો મયિ શઙ્કનીયઃ ।
મમૈવ જન્માન્તરપાતકાનાં વિપાકવિસ્ફૂર્જિથુરપ્રસહ્યઃ ॥ ૧૪-૬૨ ॥

ઉપસ્થિતાં પૂર્વમપાસ્ય લક્ષ્મીં વનં મયા સાર્ધમસિ પ્રપન્નઃ ।
તદાસ્પદં પ્રાપ્ય તયાતિરોષાત્સોઢાસ્મિ ન ત્વદ્ભવને વસન્તી ॥ ૧૪-૬૩ ॥

નિશાચરોપપ્લુતભર્તૃકાણાં તપસ્વિનીનાં ભવતઃ પ્રસાદાત્ ।
ભૂત્વા શરણ્યા શરણાર્થમન્યં કથં પ્રપત્સ્યે ત્વયિ દીપ્યમાને ॥ ૧૪-૬૪ ॥

કિંવા તવાત્યન્તવિયોગમોઘે કુર્યામુપેક્ષાં હતજીવિતેઽસ્મિન્ ।
સ્યાદ્રક્ષણીયં યદિ મે ન તેજસ્તદીયમન્તર્ગતમન્તરાયઃ ॥ ૧૪-૬૫ ॥

સાહં તપઃ સૂર્યનિવિષ્ટદૃષ્ટિરૂર્ધ્વં પ્રસૂતેશ્ચરિતું યતિષ્યે ।
ભૂયો યથા મે જનનાન્તરેઽપિ ત્વમેવ ભર્તા ન ચ વિપ્રયોગઃ ॥ ૧૪-૬૬ ॥

નૃપસ્ય વર્ણાશ્રમપાલનં યત્સ એવ ધર્મો મનુના પ્રતીતઃ ।
નિર્વાસિતાપ્યેવમતસ્ત્વયાહં તપસ્વિસામાન્યમવેક્ષણીયા ॥ ૧૪-૬૭ ॥

તથેતિ તસ્યાઃ પ્રતિગૃહ્ય વાચં રામાનુજે દૃષ્ટિપથં વ્યતીતે ।
સા મુક્તકણ્ઠં વ્યસનાતિભારાચ્ચક્રન્દ વિગ્ના કુરરીવ ભૂયઃ ॥ ૧૪-૬૮ ॥

નૃત્યં મયૂરાઃ કુસુમાનિ વૃક્ષા દર્ભાનુપાત્તાન્વિજહુર્હરિણ્યઃ ।
તસ્યાઃ પ્રપન્ને સમદુઃખભાવમત્યન્તમાસીદ્રુદિતં વનેઽપિ ॥ ૧૪-૬૯ ॥

તામભ્યગચ્છદ્રુદિતાનુકારી કવિઃ કુશેધ્માહરણાય યાતઃ ।
નિષાદવિદ્ધાણ્ડજદર્શનોત્થઃ શ્લોકત્વમાપદ્યત યસ્ય શોકઃ ॥ ૧૪-૭૦ ॥

તમશ્રુ નેત્રાવરણં પ્રમૃજ્ય સીતા વિલાપાદ્વિરતા વવન્દે ।
તસ્યૈ મુનિર્દોહદલિઙ્ગદર્શી દાશ્વાન્સુપુત્રાશિષમિત્યુવાચ ॥ ૧૪-૭૧ ॥

જાને વિસૃષ્ટાં પ્રણિધાનતસ્ત્વાં મિથ્યાપવાદક્ષુભિતેન ભર્ત્રા ।
તન્મા વ્યથિષ્ઠા વિષયાન્તરસ્ત્વં પ્રાપ્તાસિ વૈદેહિ પિતુર્નિકેતમ્ ॥ ૧૪-૭૨ ॥

ઉત્ખાતલોકત્રયકણ્ટકેઽપિ સત્યપ્રતિજ્ઞેઽપ્યવિકત્થનેઽપિ ।
ત્વાં પ્રત્યકસ્માત્કલુષપ્રવૃત્તાવસ્ત્યેવ મન્યુર્ભરતાગ્રજે મે ॥ ૧૪-૭૩ ॥

તવોરુકીર્તિઃ શ્વશુરઃ સખા મે સતાં ભવોચ્છેદકરઃ પિતા તે ।
ધુરિ સ્થિતા ત્વં પતિદેવતાનાં કિં તન્ન યેનાસિ મમાનુકમ્પ્યા ॥ ૧૪-૭૪ ॥

તપસ્વિસંસર્ગવિનીતસત્ત્વે તપોવને વીતભયા વસાસ્મિન્ ।
ઇતો ભવિષ્યત્યનઘપ્રસૂતેરપત્યસંસ્કારમયોવિધિસ્તે ॥ ૧૪-૭૫ ॥

અશૂન્યતીરાં મુનિસંનિવેશૈસ્તમોપહન્ત્રીં તમસાં વગાહ્ય ।
તત્સૈકતોત્સઙ્ગબલિક્રિયાભિઃ સંપત્સ્યતે તે મનસઃ પ્રસાદઃ ॥ ૧૪-૭૬ ॥

પુષ્પં ફલં ચાર્તવમાહરન્ત્યો બીજં ચ બાલેયમકૃષ્ટરોહિ ।
વિનોદયિષ્યન્તિ નવાભિષઙ્ગામુદારવાચો મુનિકન્યકાસ્ત્વામ્ ॥ ૧૪-૭૭ ॥

પયોઘટૈરાશ્રમબાલવૃક્ષાન્સંવર્ધયન્તી સ્વબલાનુરૂપૈઃ ।
અસંશયં પ્રાક્તનયોપપત્તેઃ સ્તનંધયપ્રીતિમવાપ્સ્યસિ ત્વમ્ ॥ ૧૪-૭૮ ॥

અનુગ્રહપ્રત્યભિનન્દિનીં તાં વાલ્મીકિરાદાય દયાર્દ્રચેતાઃ ।
સાયં મૃગાધ્યાસિતવેદિપાર્શ્વં સ્વમાશ્રમં શાન્તમૃગં નિનાય ॥ ૧૪-૭૯ ॥

તામર્પયામાસ ચ શોકદીનાં તદાગમપ્રીતિષુ તાપસીષુ ।

નિર્વિષ્ટસારાં પિતૃભિર્હિમાંશોરન્ત્યાં કલાં દર્શ ઇવૌષધીષુ ॥ ૧૪-૮૦ ॥

તા ઇઙ્ગુદીસ્નેહકૃતપ્રદીપમાસ્તીર્ણમેધ્યાજિનતલ્પમન્તઃ ।
તસ્યૈ સપર્યાનુપદં દિનાન્તે નિવાસહેતોરુટજં વિતેરુઃ ॥ ૧૪-૮૧ ॥

તત્રાભિષેકપ્રયતા વસન્તી પ્રયુક્તપૂજા વિધિનાતિથિભ્યઃ ।
વન્યેન સા વલ્કલિની શરીરં પત્યુઃ પ્રજાસંતતયે બભાર ॥ ૧૪-૮૨ ॥

અપિ પ્રભુઃ સાનુશયોઽધુના સ્યાત્કિમુત્સુકઃ શક્રજિતોઽપિ હન્તા ।
શશંસ સીતાપરિદેવનાન્તમનુષ્ઠિતં શાસનમગ્રજાય ॥ ૧૪-૮૩ ॥

બભૂવ રામઃ સહસા સબાષ્પસ્તુષારવર્ષીવ સહસ્યચન્દ્રઃ ।
કૌલીનભીતેન ગૃહાન્નિરસ્તા ન તેન વૈદેહસુતા મનસ્તઃ ॥ ૧૪-૮૪ ॥

નિગૃહ્ય શોકં સ્વયમેવ ધીમાન્વર્ણાશ્રમાવેક્ષણજાગરૂકઃ ।
સ ભ્રાતૃસાધારણભોગમૃદ્ધં રાજ્યં રજોરિક્તમનાઃ શશાસ ॥ ૧૪-૮૫ ॥

તામેકભાર્યાં પરિવાદભીરોઃ સાધ્વીમપિ ત્યક્તવતો નૃપસ્ય ।
વક્ષસ્યસંઘટ્ટસુખં વસન્તી રેજે સપત્નીરહિતેવ લક્ષ્મીઃ ॥ ૧૪-૮૬ ॥

સીતાં હિત્વા દશમુખરિપુર્નોપમેયે યદન્યાં
તસ્યા એવ પ્રતિકૃતિસખો યત્ક્રતૂનાજહાર ।
વૃત્તાન્તેન શ્રવણવિષયપ્રાપિણા તેન ભર્તુઃ
સા દુર્વારં કથમપિ પરિત્યાગદુઃખં વિષેહે ॥ ૧૪-૮૭ ॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસકૃતૌ
સીતાપરિત્યાગો નામ ચતુર્દશઃ સર્ગઃ ॥

Encoded and Proofread by Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha 14 by Kalidas*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*